श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ स्वस्तिवाचनानुवाकाः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ स्वस्तिवाचनानुवाकाः ॥

## सग्ं॒हितायाम्

॥ हरिः ओ(४)म् ॥

आ॒शुः शिशा॑नो वृष॒भो न यु॒ध्मो
घ॑नाघ॒नः क्षोभ॑णश्चर्षणी॒नाम्।
स॒ङ्क्रन्द॑नोऽनिमि॒ष ए॑क वी॒रः श॒तग्ं
सेना॑ अजयथ्सा॒कमिन्द्र॑ः।
स॒ङ्क्रन्द॑नेनाऽनिमि॒षेण॑ जि॒ष्णुना॑
युत्का॒रेण॑ दुश्च्यव॒नेन॑ धृ॒ष्णुना᳚।
तदिन्द्रे॑ण जयत॒ तथ्स॑हध्वं॒ युधो॑
नर॒ इषु॑हस्तेन॒ वृष्णा᳚।
स इषु॑हस्तै॒ः स नि॑ष॒ङ्गिभि॑र्व॒शी
सग्ग्स्र॑ष्टा॒ स यु॒ध इन्द्रो॑ ग॒णेन॑।
स॒ग्ं॒सृ॒ष्ट॒जिथ्सो॑म॒पा बा॑हुश॒र्ध्यू᳚र्ध्वध॑न्वा॒
प्रति॑हिताभि॒रस्ता᳚।
बृह॑स्पते॒ परि॑ दीया॒ ॥ **16** ॥

Please let us know of any errors in this text.

रथे॑न रक्षो॒हाऽमित्रा॑ग्ं अप॒बाध॑मानः।
प्र॒भ॒ञ्जन्थ्सेना᳚ः प्रमृ॒णो यु॒धा
  जय॑न्न॒स्माक॑मेध्यवि॒ता रथा॑नाम्।
गो॒त्र॒भिदं॑ गो॒विदं॒ वज्र॑बाहुं॒
  जय॑न्त॒मज्म॑ प्रमृ॒णन्त॒मोज॑सा।
इ॒मग्ं स॑जाता॒ अनु॑वीरयध्व॒मिन्द्र॑ग्ं
  सखा॒योऽनु॒ सग्ं र॑भध्वम्।
ब॒ल॒वि॒ज्ञा॒यः स्थवि॑रः॒ प्रवी॑रः॒ सह॑स्वान्
  वा॒जी सह॑मान उ॒ग्रः।
अ॒भिवी॑रो अ॒भिस॑त्वा सहो॒जा
  जैत्र॑मिन्द्र॒ रथ॒माति॑ष्ठ गो॒वित्।
अ॒भि गो॒त्राणि॒ सह॑सा॒ गाह॑मानोऽदा॒यो॥ **17**॥

वी॒रश्श॒तम॑न्यु॒रिन्द्रः॑।
दु॒श्च्य॒व॒नः पृ॑तना॒षाड॑यु॒ध्यो᳚ऽस्माक॒ग्ं॒
  सेना॑ अवतु॒ प्र यु॒थ्सु।
इन्द्र॑ आसां ने॒ता बृह॒स्पति॒र्दक्षि॑णा
  य॒ज्ञः पु॒र ए॑तु॒ सोमः॑।
दे॒व॒से॒नाना॑मभिभञ्जती॒नां जय॑न्तीनां
  म॒रुतो॑ य॒न्त्वग्रे᳚।
इन्द्र॑स्य॒ वृष्णो॒ वरु॑णस्य॒ राज्ञ॑

आदि॒त्यानां᳚ म॒रुता॒गं॒ शर्ध॑ उ॒ग्रम्।
म॒हाम॑नसां भुवनच्य॒वानां॒ घोषो॑
दे॒वानां॒ जय॑ता॒मुद॑स्थात्।
अ॒स्माक॒मिन्द्र॒ः समृ॑तेषु ध्व॒जेष्व॒स्माक॒ं या
इष॑व॒स्ता ज॑यन्तु॥ **18**॥

अ॒स्माकं᳚ वी॒रा उत्त॑रे भवन्त्व॒स्मानु॑
देवा अवता॒ हवे॑षु।
उद्धर्॑षय मघव॒न्नायु॑धा॒न्युथ्सत्व॑नां
माम॒काना॒ं महाग्ं॑सि।
उद्वृ॑त्रहन्वा॒जिना॒ं वाजि॑ना॒न्युद्रथा॑ना॒ं
जय॑तामेतु॒ घोष॑ः।
उप॒ प्रेत॒ जय॑ता नरः स्थि॒रा व॑ः सन्तु बा॒हव॑ः।
इन्द्रो॑ व॒ः शर्म॑ यच्छत्वनाधृ॒ष्या यथाऽस॑थ।
अव॑सृष्टा॒ परा॑ पत॒ शर॑व्ये॒ ब्रह्म॑सग्ं॑शिता।
गच्छा॒मित्रा॒न्प्र -॥ **19**॥

वि॑श॒ मैषा॒ं कञ्च॒नोच्छि॑षः।
मर्मा॑णि ते॒ वर्म॑भिश्छादयामि॒ सोम॑स्त्वा॒
राजा॒ऽमृते॑ना॒भिव॑स्ताम्।
उ॒रोर्वरी॑यो॒ वरि॑वस्ते अस्तु॒
जय॑न्त॒ं त्वामनु॑ मदन्तु दे॒वाः।

यत्र॑ बा॒णाः स॒म्पत॑न्ति कुमा॒रा वि॑शि॒खा इ॑व।
इन्द्रो॑ न॒स्तत्र॑ वृत्र॒हा वि॑श्वा॒हा शर्म॑ यच्छतु॥ **20**॥

जी॒मूत॑स्येव भवति॒ प्रती॑कं॒ यद्व॒र्मी
याति॑ स॒मदा॑मु॒पस्थे᳚।
अना॑विद्धया त॒नुवा॑ जय॒ त्वग्ं स त्वा॒
वर्म॑णो महि॒मा पि॑पर्तु।
धन्व॑ना॒ गा धन्व॑ना॒ऽऽजिं ज॑येम॒ धन्व॑ना
ती॒व्रास्स॒मदो॑ जयेम।
धनु॒श्शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒
सर्वा᳚ः प्र॒दिशो॑ जयेम।
व॒क्ष्यन्ती॒वेदा ग॑नीगन्ति॒ कर्णं॑ प्रि॒यग्ं
सखा॑यं परिषस्वजा॒ना।
योषे॑व शिङ्क्ते॒ वित॒ताऽधि॒ धन्व॒ - ॥ **27**॥

ज्या इ॒यग्ं सम॑ने पा॒रय॑न्ती।
ते आ॒चर॑न्ती॒ सम॑नेव॒ योषा॑ मा॒तेव॑
पु॒त्रं बि॑भृतामु॒पस्थे᳚।
अप॒ शत्रू॑न् विध्यताग्ं संवि॒दा॒ने आर्त्नी॑
इ॒मे वि॑ष्फु॒रन्ती॑ अ॒मित्रा॑न्।
ब॒ह्वी॒नां पि॒ता ब॒हुर॑स्य पु॒त्रश्चि॒श्चा
कृ॑णोति॒ सम॑नाऽव॒गत्य॑।

इ॒षु॒धिस्सङ्का॒ः पृत॑नाश्च॒ सर्वा॑ः पृ॒ष्ठे
  निन॑द्धो जयति॒ प्रसू॑तः।
रथे॒ तिष्ठ॑न्नयति वा॒जिन॑ः पु॒रो यत्र॑यत्र
  का॒मय॑ते सुषार॒थिः।
अ॒भीशू॑नां महि॒मान॑॥ **28**॥

पनायत॒ मन॑ः प॒श्चादनु॑ यच्छन्ति र॒श्मय॑ः।
ती॒व्रान्घोषा॑न्कृण्वते॒ वृष॑पाण॒योऽश्वा॒
  रथे॑भिस्स॒ह वा॒जय॑न्तः।
अ॒व॒क्राम॑न्त॒ः प्रप॑दैर॒मित्रा॑न्क्षि॒णन्ति॒
  शत्रू॒गं॒रन॑पव्ययन्तः।
र॒थ॒वाह॑नग्ं ह॒विर॑स्य॒ नाम॒
  यत्राऽऽयु॑धं॒ निहि॑तमस्य॒ वर्म॑।
तत्रा॒ रथ॒मुप॑ श॒ग्मग्ं स॑देम वि॒श्वाऽहा॑
  व॒यग्ं सु॑मन॒स्यमा॑नाः।
स्वा॒दु॒ष॒ग्ं॒ सद॑ः पि॒तरो॑ वयो॒धाः
  कृ॑च्छ्रे॒श्रित॒श्शक्ती॑वन्तो गभी॒राः।
चि॒त्रसे॑ना॒ इषु॑बला॒ अमृ॑ध्रास्स॒तोवी॑रा
  उ॒रवो॑ व्रातसा॒हाः।
ब्राह्म॑णास॒ः॥ **29**॥

पितं॑र॒स्सोम्या॑सश्शि॒वे नो॒ द्यावा॑पृथि॒वी
अ॑ने॒हसा॑ँ।
पू॒षा न॑ः पातु दुरि॒ताद्दं॑तावृधो॒ रक्षा॒ माकि॑र्नो
अ॒घशग्ं॑स ईशत।
सु॒प॒र्णं व॑स्ते मृ॒गो अ॑स्या॒ दन्तो॒
गोभि॒स्सन्न॑द्धा पतति॒ प्रसू॑ता।
यत्रा॒ नर॒स्सं च॒ वि च॒ द्रव॑न्ति॒
तत्रा॒ऽस्मभ्य॒मिषं॑व॒श्शर्म॑ यग्ंसन्न्।
ऋजी॑ते॒ परि॑ वृङ्धि॒ नोऽश्मा॑ भवतु न॒स्त॒नूः।
सोमो॒ अधि॑ ब्रवीतु॒ नोऽदि॑ति॒ - ॥ **30** ॥

श्शर्म॑ यच्छतु।
आ ज॑ङ्घन्ति॒ सान्वे॑षां ज॒घना॒ग्॒ उप॑ जिघ्नते।
अश्वा॑जनि॒ प्रचे॑त॒सोऽश्वा॑न्थ्स॒मथ्सु॑ चोदय।
अहि॑रिव भो॒गैः पर्ये॑ति बा॒हुं ज्याया॑
हे॒तिं प॑रि॒बाध॑मानः।
ह॒स्त॒घ्नो विश्वा॑ व॒युना॑नि वि॒द्वान्पुमा॒न्पुमाग्ं॑सं॒
परि॑ पातु वि॒श्वत॑ः।
वन॑स्पते वी॒ड्व॑ङ्गो॒ हि भू॒या अ॒स्मथ्स॑खा
प्र॒तर॑णस्सु॒वीर॑ः।
गोभि॒स्सन्न॑द्धो असि वी॒डय॑स्वाऽऽस्था॒ता

ते॑ जयतु॒ जेत्वा॑नि।
दि॒वः पृ॑थि॒व्याः पर्यो -॥ 31॥

ज॒ उद्भृ॑तं॒ वन॒स्पति॑भ्य॒ः पर्याभृ॑त॒ग्ं॒ सह॑ः।
अ॒पामो॒ज्मान॒॑ परि॒ गोभि॒रावृ॑त॒मिन्द्र॑स्य॒ वज्रग्ं॑
ह॒विषा॒ रथ॑यज।
इन्द्र॑स्य॒ वज्रो॑ म॒रुता॒मनी॑कं मि॒त्रस्य॒ गर्भो॒
वरु॑णस्य॒ नाभि॑ः।
सेमान्नो॑ ह॒व्यदा॑तिं जु॒षा॒णो दे॑व रथ॒
प्रति॑ह॒व्या गृ॑भाय।
उप॑ श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑
मनुता॒ं विष्ठि॑तं॒ जग॑त्।
स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒रा -॥ 32॥

द्वी॑यो॒ अप॑ सेध॒ शत्रून्॑।
आ क्र॑न्दय॒ बल॒मोजो॑ न॒ आ धा॒ निष्ट॑निहि
दु॒रि॒ता बाध॑मानः।
अप॑ प्रोथ दुन्दुभे दु॒च्छुनाग्ं॑ इ॒त इन्द्र॑स्य
मु॒ष्टिर॑सि वी॒डय॑स्व।
आऽमूर॑ज प्र॒त्याव॑र्तये॒माः
के॑तु॒मद्दु॑न्दु॒भिर्वा॑वदीति।

समश्वं॑पर्णा॒श्चर॑न्ति नो॒ नरो॒ऽस्माक॑मिन्द्र
  र॒थिनो॑ जयन्तु॥ **33**॥

ममा॑ग्ने॒ वर्चो॑ विह॒वेष्व॑स्तु
  व॒यं त्वेन्धा॑नास्त॒नुवं॑ पुषेम।
मह्यं॑ नमन्तां प्र॒दिश॒श्चत॑स्र॒स्त्वयाऽध्य॑क्षेण॒
  पृत॑ना जयेम।
मम॑ दे॒वा वि॑ह॒वे स॑न्तु सर्व॒
  इन्द्रा॑वन्तो म॒रुतो॒ विष्णु॑र॒ग्निः।
मम॒न्तरि॑क्ष मु॒रु गो॒पम॑स्तु
  मह्यं॒ वात॑ः पवतां॒ कामे॑ अ॒स्मिन्न्।
मयि॑ दे॒वा द्रवि॑ण॒मा य॑जन्तां॒
  मय्या॒शीर॑स्तु॒ मयि॑ दे॒वहू॑तिः।
दैव्या॒ होता॑रा वनिषन्त॒॥ **29**॥

पूर्वे॑ऽरि॑ष्टाः स्याम त॒नुवा॑ सु॒वीरा॑ः।
मह्यं॑ यजन्तु॒ मम॒ यानि॑
  ह॒व्याऽऽकू॑तिः स॒त्या मन॑सो मे अस्तु।
एनो॒ मानिगा॑ कत॒मच्च॒नाऽहं विश्वे॑
  देवासो॒ अधि॑ वोचता मे।
देवी॑ः षडुर्वीरु॒रुण॑ः कृणोत॒
  विश्वे॑ देवास इ॒ह वी॑रयध्वम्।

माहाँ᳚स्महि प्र॒जया॒ मा

त॒नूभि॒र्मार॑धाम द्विष॒ते सो॑म राजन्न्।

अ॒ग्निर्म॒न्युं प्र॑तिनु॒दन्पु॒रस्ता॒ -॥ **30**॥

दद॑ब्धो गो॒पाः परि॑पाहि न॒स्त्वम्।

प्र॒त्यञ्चो॑ यन्तु नि॒गुत॒ः पुन॒स्ते॑ऽमैषां᳚ चि॒त्तं

प्र॒बुधा॒ विने॑शत्।

धा॒ता धा॑तॄ॒णां भुव॑नस्य॒ यस्पति॑र्दे॒वग्ं

स॑वि॒तार॑मभिमाति॒षाह᳚म्।

इ॒मं य॒ज्ञम॒श्विनो॒भा बृह॒स्पति॑र्दे॒वाः पा᳚न्तु॒

यज॑मानं न्य॒र्थात्।

उ॒रु॒व्यचा॑नो महि॒षश्शर्म॑

यग्ंसद॒स्मिन् हवे॑ पुरुहू॒तः पु॑रु॒क्षु।

सनः॑ प्र॒जायै॑ हर्यश्व मृड॒येन्द्र॒ मा॥ **31**॥

नो॑ रीरिषो॒ मा परा॑दाः।

येनः॑ स॒पत्ना॒ अप॒ ते भ॑वन्त्विन्द्रा॒ग्निभ्या॒मव॑

बाधामहे॒ तान्।

वस॑वो रु॒द्रा आ॑दि॒त्या उ॑परि॒ स्पृश᳚ं

मो॒ग्रं चेत्ता॑रमधिरा॒जम॑क्रन्न्।

अ॒र्वाञ्च॒मिन्द्र॑म॒मुतो॑ हवामहे॒

यो गो॒जिद्ध॑न॒जिद॑श्व॒जिद्यः।

इ॒मं नो॑ य॒ज्ञं वि॑ह॒वे जु॑षस्वा॒स्य
कु॑र्मो हरिवो मे॒दिनं॑ त्वा॥ **32**॥

अ॒ग्नेर्म॑न्वे प्र॒थ॒मस्य॒ प्रचे॑तसो॒
यं पाञ्च॑जन्यं ब॒हवः॑ समि॒न्धते॑॥
विश्व॑स्यां वि॒शि प्र॑विविशि॒वाग्ं
सं॑मीमहे॒ स नो॑ मुञ्च॒त्वग्ं॑ह॒सः॑।
यस्ये॒दं प्रा॒णन्नि॑मि॒षद्यदेज॑ति॒
यस्य॑ जा॒तं जन॑मानं च॒ केव॑लम्।
स्तौम्य॒ग्निं ना॑थि॒तो जो॑हवीमि॒
स नो॑ मुञ्च॒त्वग्ं॑ह॒सः॑।
इन्द्र॑स्य मन्ये प्र॒थ॒मस्य॒ प्रचे॑तसो
वृ॒त्र॒घ्नः स्तोमा॒ उप॒ मामु॒पागुः॑।
यो दा॒शुषः॑ सु॒कृतो॒ हव॒मुप॒ गन्ता॒॥ **33**॥

स नो॑ मुञ्च॒त्वग्ं॑ह॒सः॑।
यः सं॑ग्रा॒मं नय॑ति॒ सं व॒शी यु॒धे
यः पु॒ष्टानि॑ सग्ंसृ॒जति॑ त्र॒याणि॑।
स्तौमीन्द्रं॑ ना॒थि॒तो जो॑हवीमि॒
स नो॑ मुञ्च॒त्वग्ं॑ह॒सः॑।
म॒न्वे वां॑ मित्रावरुणा॒ तस्य॑ वित्त॒ग्ं॒
सत्यौ॑जसा दृग्ंहणा॒ यं नु॒देथे॑।

या राजा॑नग्ं स॒रथं॑ या॒थ उ॑ग्रा॒
 ता नो॑ मुञ्चत॒माग॑सः।
यो वा॒ग्ं॒ रथ॑ ऋ॒जुर॑श्मिः स॒त्यध॑र्मा॒
 मिथु॒श्चर॑न्तमुप॒याति॑ दू॒षयन्न्॑।
स्तौमि॑॥ **34**॥

मि॒त्रावरु॑णा नाथि॒तो जो॑हवीमि॒
 तौ नो॑ मुञ्चत॒माग॑सः।
वा॒योः स॑वि॒तुर्वि॒दथा॑नि मन्महे॒
 यावा॑त्म॒न्वद्बि॑भृ॒तो यौ च॒ रक्ष॑तः।
यौ विश्व॑स्य परि॒भू ब॑भू॒वतु॒स्तौनो॑
 मुञ्चत॒माग॑सः।
उप॒श्रेष्ठा॑न आ॒शिषो॑ दे॒वयो॒र्धर्मे॑ अस्थिरन्।
स्तौमि॑ वा॒युग्ं स॑वि॒तारं॑ नाथि॒तो जो॑हवीमि॒
 तौ नो॑ मुञ्चत॒माग॑सः।
र॒थीत॑मौ रथी॒नाम॑ह्व ऊ॒तये॒
 शुभं॒ गमि॑ष्ठौ सु॒यमे॑भि॒रश्वैः॑।
ययो॑ -॥ **35**॥

वां॑ देवौ दे॒वेष्वनि॑शित॒मोज॒स्तौ
 नो॑ मुञ्चत॒माग॑सः।
यदया॑तं वह॒तुग्ं सू॒र्याया॑स्त्रिच॒क्रेण॑

स॒ग्ं॒सद॑मि॒च्छमा॑नौ।
स्तौमि॑ दे॒वाव॒श्विनौ॑ नाथि॒तो जो॑हवीमि॒
तौ नो॑ मुञ्चत॒माग॑सः।
म॒रुतां॓ मन्वे॒ अधि॑ नो ब्रुवन्तु॒
प्रेमां वाचं॒ विश्वा॑मवन्तु॒ विश्वे॓।
आ॒शून् हु॑वे सु॒यमा॑नू॒तये॒
ते नो॑ मुञ्च॒न्त्वेन॑सः।
ति॒ग्ममायु॑धं वीडि॒तग्ं सह॑स्वद्दि॒व्यग्ं
शर्धः॒ ॥ **36** ॥

पृत॑नासु जि॒ष्णु।
स्तौमि॑ दे॒वान्म॒रुतो॑ नाथि॒तो जो॑हवीमि॒
ते नो॑ मुञ्च॒न्त्वेन॑सः।
दे॒वानां॓ मन्वे॒ अधि॑ नो ब्रुवन्तु॒
प्रेमां वाचं॒ विश्वा॑मवन्तु॒ विश्वे॓।
आ॒शून् हु॑वे सु॒यमा॑नू॒तये॒
ते नो॑ मुञ्च॒न्त्वेन॑सः।
यदि॒दं मा॑ऽभि॒शोच॑ति॒ पौरु॑षेयेण॒ दैव्ये॑न।
स्तौमि॒ विश्वा॓न्दे॒वान्ना॑थि॒तो जो॑हवीमि॒
ते नो॑ मुञ्च॒न्त्वेन॑सः।
अनु॑नो॒ऽद्यानु॑मति॒र - ॥ **37** ॥

न्विदंनुमते त्वं वैंश्वानरो नं ऊत्या पृष्टो दिवि।
ये अप्रंथेताममिंतेभिरोजोंभिर्ये
 प्रंतिष्ठे अभंवतां वसूंनाम्।
स्तौमि द्यावांपृथिवी नांथितो जोंहवीमि
 ते नों मुञ्चतमगंह्ंसः।
उर्वी रोदसी वरिंवः कृणोतं क्षेत्रंस्य
 पत्नी अधिंनो ब्रूयातम्।
स्तौमि द्यावांपृथिवी नांथितो जोंहवीमि
 ते नों मुञ्चतमगंह्ंसः।
यत्तें वयं पुंरुषत्रायं
 विष्ठाविंद्वाग्ंसश्चकृमा कच्चना॥ **38**॥

ऽऽगंः।
कृधी स्वंस्मागं अदिंतेरनांगा
 व्येनाग्ंसि शिश्रथो विष्वंगग्ने।
यथांह तद्वंसवो
 गौर्यं चित्पदिषितामम्ंञ्चता यजत्राः।
एवा त्वमस्मत्प्रमुंञ्चाव्यगंह्ः प्रातांर्यग्ने
 प्रतरां न आयुंः॥ **39**॥

अग्नेर्मन्वे यस्येदमिन्द्रंस्य यस्संङ्ग्रामगं स नों
 मुञ्चत्वगंह्ंसः।

म॒न्वे वां॒ ता नो॑ मुञ्चत॒माग॑सः।
यो वां॒ वा॒योरुप॑ र॒थीत॑मौ॒ यदयां॑तम॒श्विनौ॒ तौ नो॑
मुञ्चत॒माग॑सः।
म॒रुतां॒ ति॒ग्मं म॒रुतो॑ दे॒वानां॒ यदि॒दं विश्वा॒न्ते नो॑
मुञ्च॒न्त्वेन॑सः।
अनु॑ न॒ उर्वी॒ द्यावा॑पृथि॒वी ते नो॑ मुञ्चत॒मग्ं॒ह॑सो॒ यत्तैः॑।
च॒तुरग्ं॒ह॑स॒ष्षडाग॑सश्च॒तुरेन॑सो॒ द्विरग्ं॒ह॑सः॥

॥ इति स्वस्तिवाचनानुवाकाः समाप्ताः॥